



॥ शारदाचतुःषष्टिः ॥

श्रीमत्परमहंसेत्यादिसमस्तबिरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि

श्रीसच्चिदानन्दशिवाभिनव

नृसिंहभारतीस्वामिभिः

विरचिता ।



श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रिता ।

१९०८.

Copyright Registereed.



॥ शृङ्गगिरि श्री शारदाम्बा ॥



॥ श्रीः ॥

॥ शारदाचतुःषष्टिः ॥

अद्राक्षमव्याजकृपामपारां
श्रीशारदाम्बाभिधया लसन्तीम् ।
श्रीशृङ्गपुर्यामधिचक्रमध्यं
इतः परं किं करणीयमस्ति ॥ १ ॥

अद्राक्षमम्भोजभवस्य पुण्य-
परम्परामाश्रितदिव्यमूर्तिम् ।
मालासुधाकुम्भलसत्कराब्जां
इतः परं किं करणीयमस्ति ॥ २ ॥

अद्राक्षमानन्दपयोधिराका-
सुधाकराणामिव रम्यपङ्क्तिम् ।
विबोधमुद्रावरपुस्तकाढ्यां
इतः परं किं करणीयमस्ति ॥ ३ ॥

अद्राक्षमुत्तुङ्गतरङ्गतुङ्गा-
तटान्तराजद्वरमन्दिरस्थाम् ।
शशाङ्कबालोज्ज्वलदिव्यमौलिं
इतः परं किं करणीयमस्ति ॥ ४ ॥

अद्राक्षमर्धेन्दुसमानफालां
लावण्यसर्वस्वपयोधिवेलाम् ।
कीलालसंभूतसमुत्थलोलां
इतः परं किं करणीयमस्ति ॥ ५ ॥

अद्राक्षमिन्दीवरतुल्यनेत्रां
भ्रूवल्लिकानिर्जितकामचापाम् ।
तुङ्गानदीतीरविहारशीलां
इतः परं किं करणीयमस्ति ॥ ६ ॥

अद्राक्षमक्ष्णोर्जनिमर्थयुक्तां
प्रकुर्वतीं स्वाङ्घ्रिनिरीक्षणेन ।
पयःप्रभूतप्रभवस्य जायां
इतः परं किं करणीयमस्ति ॥ ७ ॥

अद्राक्षमिक्षूदतरङ्गतुल्यां
वाचं नतानां ददतीं जवेन ।
लोकेशवामाङ्कमहद्विभूषां
इतः परं किं करणीयमस्ति ॥ ८ ॥

अद्राक्षमास्येन्दुविलोकनेन
विकासयन्तीं हृदयाम्बुजानि ।
प्रणम्रपङ्क्तेर्वचसां सवित्रीं
इतः परं किं करणीयमस्ति ॥ ९ ॥

अद्राक्षमज्ञानतमःप्रचण्ड-
मार्तण्डषण्डीकृतपादसेवाम् ।
अपारसच्चित्सुखरूपदेहां
इतः परं किं करणीयमस्ति ॥ १० ॥

अद्राक्षमक्षीणदयारसार्द्र-
कटाक्षसंरक्षितलोकजालाम् ।
अजान्तरङ्गाम्बुजभानुरूपां
इतः परं किं करणीयमस्ति ॥ ११ ॥

अद्राक्षमात्मानमशेषलोक-
प्रवृत्तिसाक्ष्यात्मतया विभान्तीम् ।
गुप्त्यै प्रपञ्चस्य कृतावतारां
इतः परं किं करणीयमस्ति ॥ १२ ॥

अद्राक्षमत्यन्तविरक्तिभक्ति-
श्रद्धाप्रमुख्यैः सुगुणैः सुलभ्याम् ।
सुदुर्लभां तद्गुणहीनलोकैः
इतः परं किं करणीयमस्ति ॥ १३ ॥

अद्राक्षमम्भोजभवाब्जनेत्र-
गिरीशमुख्यैः परिपूज्यमानाम् ।
वीणालसत्पाणिसरोजमध्यां
इतः परं किं करणीयमस्ति ॥ १४ ॥

अद्राक्षमङ्गच्छविनिर्जितेन्दु-
नीहारहारावलिदुग्धसिन्धुम् ।
मगर्भयन्तीमगजासनाथं
इतः परं किं करणीयमस्ति ॥ १५ ॥

अद्राक्षमाद्यैर्वचसां समूहै-
राभिष्टुतां देवमुनीन्द्रसङ्घैः ।
अम्भोजमच्छं शुकमादधानां
इतः परं किं करणीयमस्ति ॥ १६ ॥

अद्राक्षमाद्यन्तविहीनशुद्ध-
बुद्धस्वभावं परमप्रमेयम् ।
विबोधयन्तीं कृपया प्रणम्रान्
इतः परं किं करणीयमस्ति ॥ १७ ॥

अद्राक्षमङ्गावहमङ्गवास-
मालोच्य वासं प्रविहाय तत्र ।
चतुर्मुखाख्याम्बुजवाससक्तां
इतः परं किं करणीयमस्ति ॥ १८ ॥

अद्राक्षमीशानरमेशपद्म-
भवादिरूपेण जगत्प्रवृत्तिम् ।
प्रकुर्वतीं शृङ्गमहीधरस्थां
इतः परं किं करणीयमस्ति ॥ १९ ॥

अद्राक्षमाम्नायशिरोवचांसि
हृदाप्यलभ्यां जगदुर्हि यां ताम् ।
विचित्रमस्याः करुणाविशेषात्
इतः परं किं करणीयमस्ति ॥ २० ॥

अद्राक्षमायासविहीनसेवा-
लवैरपि प्रीतहृदम्बुजाताम् ।
अशेषकल्याणगुणाभिरामां
इतः परं किं करणीयमस्ति ॥ २१ ॥

अद्राक्षमाकण्ठनतानुकम्पा-
मक्षिप्रभानिर्जितमीनगर्वाम् ।
वाङ्माधुरीनिर्जितकेकिलोकां
इतः परं किं करणीयमस्ति ॥ २२ ॥

अद्राक्षमैश्वर्यमपारमाशु
संप्रापयन्तीं पदनम्रलोकान् ।
दन्तच्छदापाकृतपक्वबिम्बां
इतः परं किं करणीयमस्ति ॥ २३ ॥

अद्राक्षमानम्रजनानुताप-
वाराशिसंशोषणबाडवाग्निम् ।
तुङ्गानदीखेलनलोलचित्तां
इतः परं किं करणीयमस्ति ॥ २४ ॥

अद्राक्षमाधारसरोरुहस्थां
पञ्चाननास्थिकृतप्रतिष्ठाम् ।
मुद्गौदनासक्तमनोऽम्बुजातां
इतः परं किं करणीयमस्ति ॥ २५ ॥

अद्राक्षमष्टाङ्गहठादियोग-
निबद्धभावैरनुचिन्त्यमानाम् ।
कष्टारिषड्वर्गविभेददक्षां
इतः परं किं करणीयमस्ति ॥ २६ ॥

अद्राक्षमर्कायुतभासमाना-
मनाहताख्ये हृदयाब्जमध्ये ।
फाले हि शत्रोर्धनुषः सवर्णा
इतः परं किं करणीयमस्ति ॥ २७ ॥

अद्राक्षमिन्दोः सदृशीं शिरस्थ-
सहस्रपत्रे कमले मनोज्ञे ।
त्रिकोणमध्ये वरदीपिकाभां
इतः परं किं करणीयमस्ति ॥ २८ ॥

अद्राक्षमम्बाङ्घ्रिसरोजयुग्म-
मवोचमप्यम्ब तवाभिधानम् ।
अश्रौषमंहोहरणं चरित्रं
इतः परं किं करणीयमस्ति ॥ २९ ॥

अद्राक्षमम्भोदतमःसमूह-
नीकाशकेशव्रजशोभमानाम् ।
कण्ठप्रभानिर्जितकम्बुगर्वां
इतः परं किं करणीयमस्ति ॥ ३० ॥

अद्राक्षमव्याजदयासमुद्रै-
नृसिंहभारत्यभिधैर्यतीन्द्रैः ।
मोदाच्चिरं पूजितपादपद्मां
इतः परं किं करणीयमस्ति ॥ ३१ ॥

अद्राक्षमीशानपरावतार-
श्रीशङ्करार्यैर्वरचक्रराजे ।
प्रतिष्ठितां सर्वजगत्सवित्रीं
इतः परं किं करणीयमस्ति ॥ ३२ ॥

अद्राक्षमत्यन्तविरक्तिमाशु
विश्राणयन्तीं विषयेषु सुस्थां ।
शमादिषट्कं च विनम्रपङ्क्तेः
इतः परं किं करणीयमस्ति ॥ ३३ ॥

अद्राक्षमात्मैक्यविबोधनेन
संसारवाराकरमध्यमग्नान् ।
उत्तारयन्तीं करुणाकटाक्षैः
इतः परं किं करणीयमस्ति ॥ ३४ ॥

अद्राक्षमश्वस्तननित्यवस्तु-
　　विवेकमत्यन्तमुमुक्षुतां च ।
संपादयन्तीं पदसंनतानां
　　इतः परं किं करणीयमस्ति ॥ ३५ ॥

अद्राक्षमाकाशनभस्वदग्नि-
　　जलादिरूपाणि जगन्ति सृष्ट्वा ।
प्रविश्य तेषु प्रविभासमानां
　　इतः परं किं करणीयमस्ति ॥ ३६ ॥

अद्राक्षमूरीकृतपारहंस्यै-
　　र्दूरीकृताङ्गप्रभवप्रसङ्गैः ।
विचार्यमाणां श्रुतिशीर्षवाग्भिः
　　इतः परं किं करणीयमस्ति ॥ ३७ ॥

अद्राक्षमेनां हृदि मौनिवर्यै-
　　र्विशोषयद्भिर्विषयप्रवाहान् ।
साक्षात्कृतां पङ्कजजातकान्तां
　　इतः परं किं करणीयमस्ति ॥ ३८ ॥

अद्राक्षमेतत्परिदृश्यमानं
यद्दर्शनान्नीरसमेव विश्वम् ।
तां सच्चिदानन्दघनस्वरूपां
इतः परं किं करणीयमस्ति ॥ ३९ ॥

अद्राक्षमापूर्णकलङ्कशून्य-
शीतांशुनीकाशमुखाम्बुजाताम् ।
कंजातसंजातमनोहरन्तीं
इतः परं किं करणीयमस्ति ॥ ४० ॥

अद्राक्षमाकर्णविशालनेत्रां
रम्भासमानोरुयुगाभिरामाम् ।
नागेन्द्रकुम्भप्रतिमस्तनाढ्यां
इतः परं किं करणीयमस्ति ॥ ४१ ॥

अद्राक्षमेनां जडजातजातो-
ऽप्यनेकनानाविधविश्वकर्ता ।
यत्पाणिपद्मग्रहणादभूत्तां
इतः परं किं करणीयमस्ति ॥ ४२ ॥

अद्राक्षमेनां कलिकल्मषघ्नीं
यत्पादपद्मं दिननाथतुल्यम् ।
स्वध्यातृहृद्ध्वान्तनिवारणात्तां
इतः परं किं करणीयमस्ति ॥ ४३ ॥

अद्राक्षमच्छाच्छपयोजसंस्थां
शरन्निशानाथसदृक्षचेलाम् ।
नम्रालिजिह्वाग्रकृतप्रनृत्तां
इतः परं किं करणीयमस्ति ॥ ४४ ॥

अद्राक्षमव्याहतशक्तिदात्रीं
विनिग्रहानुग्रहयोः क्षणेन ।
अपीन्द्रलोकादिसमस्तसृष्टां
इतः परं किं करणीयमस्ति ॥ ४५ ॥

अद्राक्षमेनां महिषासुरञ्च
निशुम्भशुम्भासुरयोश्च हन्त्रीम् ।
अस्वप्नलोकावनबद्धदीक्षां
इतः परं किं करणीयमस्ति ॥ ४६ ॥

अद्राक्षमालोक्य जनिं समृत्युं
जातस्य हीत्यादि नयेन वक्त्रे ।
अजं पतिं या चतुरामहं तां
इतः परं किं करणीयमस्ति ॥ ४७ ॥

अद्राक्षमेनां तरसैव नम्रान्
कुल्यामिवायासलवं विनैव ।
संतारयन्तीं भववारिराशिं
इतः परं किं करणीयमस्ति ॥ ४८ ॥

अद्राक्षमद्वैतविबोधनार्थं
कण्ठेन कम्बोर्वचसा पिकस्य ।
मध्येन सिंह्या दधतीमभेदं
इतः परं किं करणीयमस्ति ॥ ४९ ॥

अद्राक्षमेनां दयया जवेन
प्रकुर्वतीं स्वाङ्घ्रिसरोजनम्रान् ।
संपन्नसार्वज्ञसमस्तशक्तीन्
इतः परं किं करणीयमस्ति ॥ ५० ॥

अद्राक्षमग्राह्यनिजस्वरूपां
गूढामशेषे किल भूतवर्गे ।
ग्राह्यां सुखेनैव सुसूक्ष्मधीभिः
इतः परं किं करणीयमस्ति ॥ ५१ ॥

अद्राक्षमक्षासुमनोविभिन्न-
सच्चित्सुखाकारतया गुरूक्त्या ।
अवापमानन्दमपायशून्यं
इतः परं किं करणीयमस्ति ॥ ५२ ॥

अद्राक्षमेनां मुनिभिर्हि साह-
महं च सेति व्यतिहारतो या ।
विभाव्यते तां त्रिजगज्जनित्रीं
इतः परं किं करणीयमस्ति ॥ ५३ ॥

अद्राक्षमष्टादशसंख्यविद्या
वश्या यदङ्घ्र्यम्बुजलग्नबुद्धेः ।
तां सर्वविद्यामयदिव्यदेहां
इतः परं किं करणीयमस्ति ॥ ५४ ॥

अद्राक्षमेनां परिहृत्य पञ्च-
कोशान्सुधीभिः परिचिन्त्यमानाम् ।
वेदान्तसिद्धान्तविचारशीलैः
इतः परं किं करणीयमस्ति ॥ ५५ ॥

अद्राक्षमाधारगतत्रिकोणे
संतप्तहेमप्रभलिङ्गरूपाम् ।
अनाहताख्येऽरुणलिङ्गरूपां
इतः परं किं करणीयमस्ति ॥ ५६ ॥

अद्राक्षमब्जायुतकोटिशुक्ल-
लिङ्गस्वरूपां कमले शिरस्थे ।
वाणीमनोजन्मपरास्वरूपां
इतः परं किं करणीयमस्ति ॥ ५७ ॥

अद्राक्षमेनां गृहदारपुत्र-
देहेष्वहंताममते जहाति ।
यत्पादपाथोजविचिन्तनात्तां
इतः परं किं करणीयमस्ति ॥ ५८ ॥

अद्राक्षमेनां हरिदन्तजाल-
विख्यातपाण्डित्ययुता भवन्ति ।
यत्पादसंसक्तहृदो मुहुस्तां
इतः परं किं करणीयमस्ति ॥ ५९ ॥

अद्राक्षमेनां मदवद्विवादि-
गर्वेभनिर्वापणपञ्चवक्त्राः ।
यत्पादपङ्केरुहपूजकास्तां
इतः परं किं करणीयमस्ति ॥ ६० ॥

अद्राक्षमेनामपि किंपचानो
सुरेन्द्रतुल्यः प्रभवेज्जवेन ।
यन्मन्त्रजापाद्दृढभक्तितस्तां
इतः परं किं करणीयमस्ति ॥ ६१ ॥

अद्राक्षमम्लानसरोजमाला-
विभूषितोरःस्थलशीर्षभागाम् ।
अमर्त्यतेजःसमुदायरूपां
इतः परं किं करणीयमस्ति ॥ ६२ ॥

अद्राक्षमङ्गप्रभवप्रभूत-
व्यथानभिज्ञैः परिचिन्त्यमानाम् ।
चित्तामलत्वप्रदनैजचिन्तां
इतः परं किं करणीयमस्ति ॥ ६३ ॥

अद्राक्षमात्मेष्टवरप्रदान-
संतोषितानेकनतिप्रधानाः ।
अजातरूपामपि जातरूपां
इतः परं किं करणीयमस्ति ॥ ६४ ॥

अद्राक्षं नारदाद्यैः सुरमुनिनिकरैर्गीयमानापदानां
नृत्यद्दिव्याङ्गनानां करचरणलसत्कङ्कणानां रवौघैः ।
संपूर्णाशावकाशां नवनवकविताचातुरीदानदक्षां
शृङ्गाद्रौ चक्रराजस्थिरकृतनिलयां शारदां पारदाभाम् ॥

